# Vidyasagar University

# Modern Sanskrit Literature

# Semester IV

## CC- 9/1

**Section- A**
**Mahākāvya and Charitakāvya**
**Section- B**
**Gadya and Rkpaka**


## डाँ. नारायणदाशः

## डाँ. गिरिधारीपण्डाः



## বি. এন্. পাব্লিকেশন্

৩ শ্যামাচরণ দে স্ট্রীট
কলকাতা -৭০০০৭৩

श्रीः

# महाकाव्यं चरितकाव्यञ्च

(CC-9-परीक्षानिमित्तं प्रथमभागे स्थानितम्)


## व्याख्याकारः

## डॉ. नारायणदाशः

स्वर्णपदकप्राप्तः, राष्ट्रपतिपुरस्कृतः, साहित्येकादम्याः अनुवादपुरस्कारेण

सभाजितः, युवलेखकपुरस्कारेण सम्मानितश्च

व्याकरणाचार्यः, एम्.ए., एम्.फिल्., पिएच्.डी.

संस्कृतविभागाध्यक्षः

रामकृष्णमिशनावासीयस्वशासितमहाविद्यालयः

नरेन्द्रपुरम्, कलिकाता-103



## वि. एन्. पाब्लिकेशन्

3 श्यामाचरण दे ष्ट्रिट,

कलिकाता 700073

# सूची


0. भूमिका 05

1. आचार्यरेवाप्रसादद्विवेदिरचितं स्वातन्त्र्यसम्भवमहाकाव्यम् 09

2. स्वातन्त्र्यसम्भवमहाकाव्यस्य दीर्घोत्तरमूलकप्रश्नोत्तराणि 51

3. स्वातन्त्र्यसम्भवमहाकाव्यस्य लघूत्तरमूलकप्रश्नोत्तराणि 83

4. स्वातन्त्र्यसम्भवमहाकाव्यस्य अतिसंक्षिप्तप्रश्नोत्तराणि 112

5. आचार्यप्रभाकरजोशिवर्येण विरचितं भीमायनमहाकाव्यम् 119

6. भीमायनमहाकाव्यस्य दीर्घोत्तरमूलकप्रश्नोत्तराणि 170

7. भीमायनमहाकाव्यस्य लघूत्तरमूलकप्रश्नोत्तराणि 201

8. भीमायनमहाकाव्यस्य अतिसंक्षिप्तप्रश्नोत्तराणि 219


✡✡✡

# भूमिका

## अत्याधुनिकानि संस्कृतमहाकाव्यानि

अत्याधुनिकं संस्कृतसाहित्यमपि महाकाव्यं, खण्डकाव्यं, दृश्यकाव्यं, गीतिकाव्यं, गद्यकाव्यं, कथासाहित्यं, स्तोत्रसाहित्यं, कोपकाव्यं, शिलालेखकाव्यम् इत्यादिभिः सुसमृद्धं अशेषवैचित्र्यमण्डितं वर्तते। गुप्तयुगात्(ई.३५०) स्वातन्त्र्योत्तरकालं यावत् सार्द्धसहस्त्रवर्षाणां कालखण्डेऽस्मिन् संस्कृतकाव्यरचनायाः प्रवाहः आभारतमप्रतिहतः आसीत्। स्वाधीनोत्तरकालेऽपि सा धारा नितरां स्रोतस्विनी परिलक्ष्यते। स्थूलरूपेण क्रैस्तात् पूर्वं षष्ठशतकात् क्रैस्ताब्दीयविंशशतकं यावत् संस्कृतसाहित्यस्य कालसीमामाकलय्य चतुर्भिः पर्वभिस्तेषां कालखण्डानां विभाजनं कर्तुं शक्यते। तद्यथा– आदिपर्व, समृद्धिपर्व, अवक्षयपर्व, आधुनिकपर्व चेति। प्रत्येकं पर्वणः पुनरवान्तरविभागोऽपि शक्यः। क्रैस्तपूर्वाब्दात् ईशवीयचतुर्थशतकस्य अन्तिमभागपर्यन्तम् अर्थात् कालिदासस्य पूर्ववर्ती कालः स्याद् आदिपर्वान्तर्गतः। ईशवीय-पञ्चम-षष्ठशतकद्वयं संस्कृतसाहित्यस्य समृद्धेः कालः। कालेऽस्मिन् महाकवेः कालिदासस्याविर्भावः, कालिदासमधिकृत्य संस्कृत-काव्यचर्चा उन्नतेः समुच्चशिखरमारोहत्। तदा गुप्तसम्राजां शासनकालः। ते सम्राजः नवभिः रत्नैः (सभापण्डितैः) परिवेष्टिताः सन्तः सिंहासनमलङ्कुर्वन्ति स्म। काव्यकथया रसचर्चया च राजसभा मुखरिता भवति स्म। भारतवर्षस्य समाजः प्राचुर्येण परिपूर्णस्तदा सम्पूर्णञ्च भारतराष्ट्रमैश्वर्यमण्डितमासीत्। समाजस्य राष्ट्रस्य चाभ्युदयनिर्भरं साहित्यमपि तदर्थमेव युगेऽस्मिन् गौरवेण प्रतिष्ठितमासीत्। अस्य युगस्य श्रेष्ठः कविः नाट्यकारश्च कालिदास एव। ईशवीयसप्तमशतकात् क्रैस्तीयद्वादशशतकं यावत् कालखण्डेऽस्मिन् कृत्रिमकाव्यकलया आडम्बरेण अलङ्करणबाहुल्येन संस्कृतसाहित्यं भाराक्रान्तमासीत्। तथापि कालेऽस्मिन् बाण-भट्टि-भारवि-भवभूति-माघ-श्रीहर्षादीनां काव्यानि कालोत्तीर्णानि सन्ति, ते कवयश्च प्रथितयशसः कालवक्षसि अमर्त्याश्च सन्ति। ततः अवक्षयः प्रारब्धः आसीत्।

नवदशशताब्दी विंशशताब्दी चाधुनिकसंस्कृतस्य कालखण्डमिति विवेचितमस्ति। अयं कालः लौकिकसंस्कृतसाहित्यस्य पुनरभ्युदयकालत्वेनापि चिह्नितः स्यात्। डॉ.अभिराजराजेन्द्रमिश्रमहोदयानाम् अभिमतं यत् ई.१७८५ क्रैस्ताब्दात् परं लिखितं संस्कृतसाहित्यमाधुनिकपदवाच्यं स्यादिति। तेन कालस्यास्य विभाजनत्रयं कृतमित्थम्– १.पुनर्जागरणकालः (ई.१७८५-१८८५) २.स्थापनकालः (ई.१८८५-१९५०) ३.समृद्धिकालः (ई.१९५०-अधुनातनसमयं यावत्)। डि.एच.लॉरेन्स, रिचर्ड एलमान, सिरिलोकोनोली, फ्राङ्कक्रमोड् इत्यादीनां पाश्चात्त्यविदुषामाकलनं यदाधुनिककालः १९०७-१९२५ ईशवीयाब्दस्य मध्यवर्ती समयः। अर्वाचीनसंस्कृतसाहित्यस्य अपरमेकं विभाजनं डा.जगन्नाथ-पाठकेन कृतं व्यक्त्याधारितं, न तु कालाधारितं साहित्यिकप्रवृत्त्याधारितं वेति। तेन युगत्रयेण विभाजितः स चाधुनिककालखण्डोऽयमेवम्– १.अप्पाशास्त्रि-राशिवडेकरयुगम् (ई.१८७३-१९१३), २.भट्टयुगम् (ई.१९३०-१९६०), ३.डॉ.वेङ्कटराघवन्-युगम् (ई.१९६०-१९८०) इति। विषयवैचित्र्येण प्राकाशनैपुण्येन च आधुनितसंस्कृतकाव्यसाहित्यं सुसमृद्धमस्ति। पद्येन गद्येन चम्पूविधया च

विकाशयात्रा अप्रतिहतास्ति संस्कृतरससाहित्यस्यास्य इदानीमपि। संस्कृतकाव्यस्यास्य विविधशाखानां परिचयो विधिवद्धोऽस्ति अलङ्कारशास्त्रे। नूतनच्छन्दोभिः प्रकारैरनेकैश्च विचित्रं विपुलञ्च संस्कृतकाव्यमुपनिवद्धं दृश्यतेऽधुना। यथा-




संस्कृतकाव्यपरम्परायाम् इतोऽपि स्युरनेके उपविभागाः, परन्तु तेषां सर्वेषाम् अवान्तरविभागानां चर्चायाः परिसरो नास्त्यत्र। आधुनिकैः काव्यतत्त्वमीमांसकैः प्रणीतेषु अलङ्कारशास्त्रेषु वहूनामाधुनिककाव्यानां लक्षणं समुपलभ्यते। केचन आलङ्कारिकाः प्राचीनालङ्कारशास्त्रप्रतिपादितलक्षणेषु आधुनिकसंस्कृतकाव्यनामन्तर्भावः स्यादिति युक्तिं प्रतिपादयन्ति। प्रो.राधावल्लभत्रिपाठिवर्यः, प्रो.अभिराजराजेन्द्रमिश्रः,प.रेवाप्रसादद्विवेदिमहोदयः, हर्षदेवमाधवः इत्यादिभिः आधुनिककाव्यानां नूतनलक्षणवाक्यानि रचितानि सन्ति। प्राचीनमतानुसारिभिः हरिदाससिद्धान्तवागीशादिभिः आधुनिककाव्यानां प्राचीनैरालङ्कारिकैः कृतेषु काव्यलक्षणेषु कुत्रचित् समावेशः स्यादिति स्वाभिमतं प्रकटितम्।

साहित्यदर्पणानुसारेण नैके काव्यभेदाः सन्ति। तेषु पद्यकाव्यस्य वहवो भेदाः भवन्ति। तानि च मुक्तकं, युग्मकं, सन्दानितकं, कलापकं, कुलकं, महाकाव्यं, खण्डकाव्यञ्चेति। यथा-

श्रव्यं श्रोतव्यमात्रं तत्पद्यगद्यमयं द्विधा॥
छन्दोवद्धपदं पद्यं तेन मुक्तेन मुक्तकम्।
द्वाभ्यां तु युग्मकं सन्दानितकं त्रिभिरिष्यते॥
कलापकं चतुर्भिश्च पञ्चभिः कुलकं मतम्।

अग्रे विस्तारेण सर्गवन्धो महाकाव्यम्... इत्यादौ महाकाव्यलक्षणं प्रोक्तमस्ति। तस्य सारः भवति- अत्र महाकाव्ये परिच्छेदरूपाणां सर्गाणां वन्धनं महाकाव्यमित्युच्यते।